## समाजद्रष्टा
# महाराजसरसयाजिरावातृतीयमहोदयाः

**डॉ.मीरा दुबे**
**उपाध्यापिका**
**बडौदा-संस्कृत-महाविद्यालयः**
**म.स.विश्वविद्यालयः,वटोदरम्**

महाराजासयाजिरावतृतीयमहाभागानां शासनकालः काभिश्चित् दृष्टिभिः महत्वपूर्णमभवन् आसीत् । तैः प्रजानां कल्याणं राज्यहितं-संवर्द्धनं च उद्दिश्य कार्याणि कृतानि ।

कानिचित् वस्तूनि तेषां महानुभावानां ध्यानं आकर्षयति, तदैव तेषां मनसि एषः विचारः आगच्छति, यत् एतत् मम राज्यस्य-जनानां कृते उपयोगी भविष्यति वा न ? मम राज्यप्रजयोः परिस्थितिपरिवेशेषु एतस्य उपयोगिता कथं भवितुं शक्यते ।

महाराजासरसयाजिरावमहाभागः प्रगतिशीलः प्रजावत्सलः नरेशरूपेण कृतसंकल्पः।

यदा महाराजासरसयाजिरावमहाभागाः शासनाधिनमभवन् तदा स्वतंत्रता संग्रामस्य मूलाधारः स्थापितः । वंकिमचन्द्र चटर्जी महोदयस्य उपन्यास 'आनन्दमठ' प्रकाशितमभवत् । यस्मिन् वंदेमातरम् सन्यास-विद्रोहसंदेशः समाविष्टो आसीत् ।

वर्षत्रयानन्तरं 'अखिल भारतीय राष्ट्रीय कांग्रेस इति परिषदः स्थापना अभवत् ।

तदनन्तरं ब्रह्मसमाजः प्रार्थनासमाजः -आर्यसमाजः रामकृष्णमिशन-थियोसोफिकल सोसायटी इत्यादि सङ्घटनानां स्थापनं समाजसंशोधनानां प्रगतिः आसीत् ।

एतासां परिस्थितीनां प्रभावः एतेषु उपरि संस्काररूपेण प्रस्फुटितः । यस्य परिणामः अभवत् तेषां हृदयेषु सदैव राष्ट्रभावलोकतंत्रात्मकभावनयोः विकासः अभवत् ।

महाराजासरसयाजिरावमहाभागाः एकस्मिन् अधिवेशने अकथयत् यत् किं सामाजिकसंशोधनानां

आवश्यकता वतर्त ?

सम्पूर्ण समाजः दोषपूर्णः न भवितुं शक्नोति। समाजे दोषादोषाः भवन्ति एव, वयं दोषान्वेषणं कृत्वाः अपि अदोषान् स्थापयामः । दोषानां अपाकरणं नितांत आवश्यकं वर्तते । परन्तु बहुदोषाः स्थानीयाः भवन्ति। यथा-पर्दाप्रथा (आवरणप्रथा) आवरणप्रथायाः यूरोपियनजनद्वारा आलोचनानां गाम्भीर्येण स्वीकरणं बुद्धिमता नास्ति । सामाजिकान्दोलनस्योद्देश्यं किं भवेत् ? कस्यां दिशायां संशोधनस्य आवश्यकता प्रतीता भवति ?

स्त्रीशिक्षणम्-बालविवाहनिषेधः विधवा-विवाहः बहुविवाहनिषेधः जातिगतभेदानाम्उन्मूलनञ्च।

महाराजासरसयाजिरावमहाभागाः सार्वाङ्गिणसद्भाव दृष्टिया एतान् समाजिकदोषान् भागद्वयं कृतवन्तः

१. जातिप्रथयादोषः

२. स्त्रीणां दशासम्बन्धितदोषः

सामाजिकसुधारणायाः प्रकारद्वयं भवितुं शक्नोति प्रथमः संवैधानिक दृष्टया अपरं च शैक्षणिक दृष्टयाः। केवलं संवैधानिकदृष्ट्या दोषानां अपाकरणं न भवितुं शक्नोति, एतस्य मूलं अस्माकं सामाजिक व्यवस्थासु अति गर्हितं वर्तते ।

महाराजासरसयाजिरावमहाभागानां सुधारवादी आन्दोलनं निम्नलिखितमस्ति ।

१. सुधारात्मककार्यक्रमः तदा प्रभावशाली भवति यदा सः राष्ट्रीयचरित्रनिर्माणं करोति ।

२. समाजसंशोधनस्य आधारः वैज्ञानिकाध्ययने आधारीकरोति । एतेषु अस्माकं सामाजिक समस्यानां गुणतमेन बुद्धिः आश्रिता भवति ।

कश्यापि मनुष्यवत् समाजजीवनं अपि स्वपरिस्थित्यनुसारेण चलन् अन्तहीनः संघर्षः अस्ति ।

एतस्मिन् किञ्चित् अपरिवर्तनशीलं कश्चित् परिवर्तनशीलं च भवति ।

जलवायुः प्राकृतिकपरिस्थितिः भौतिकशक्तयः अपरिवर्तनशीलतत्त्वमस्ति ।

परिवर्तनशीलतत्वेषु अनेकपरिस्थितिनां समावेशः भवति यथा-आर्थिकस्थिति-राजनैतिकस्थितिः अन्यसभ्यताभिः सह संपर्कः ।

समाजे एतेन परिवेशेन सह जीवितुं क्षमतायाः आवश्यकता एव एतस्योद्देश्यस्य प्राप्त्यां तस्य

ज्ञानमेव तस्य प्रमुखशास्त्रमस्ति ।

समाज अपि कश्चन मनुष्यः इव अपरसमाजिक जीवनेन सह प्रतिस्पर्धां सङ्घर्षं च कुर्वन् भवति । यः सर्वाधिकयोग्यः वर्तते तस्य एव एतस्मिन् सङ्घर्षे अस्तित्वं भविष्यति ।

**सर्वाधिकयोग्यः सः एव अस्ति यः कुशलतया सङ्घटितः अस्ति ।**
**तस्योपयोगः सर्वान् घटकान् नववातावरणस्य अनुरूपेण करोति ।**

एकस्य मनुष्यस्य सबन्धः विभिन्नपरिवेशैः सह भवति । यथा समाजिकसम्बन्धः आर्थिक सम्बन्धः राजनैतिकसम्बन्धश्च ।

एतेषां सम्बन्धानां सङ्घटनं सर्वेषां हितानां विवेकपूर्णसंतुलने भवति । सामाजिकव्यवस्थानां प्रत्येक मनुष्यस्य अधिकाराणां विशेषधिकाराणां च विवेकपूर्णसंतुलनाय जातिप्रथानां उत्पाटनं भविष्यति, अतएव एषा प्रथा अस्माकं समाजं दुर्बलं कृत्वा आर्थिकवितरणम् असङ्गतं पश्चात् वर्तिनं च करोति ।

३. आधुनिकज्ञानं स्वीकृत्य आत्मसात् करणीयम् यथा धनुष-वाणेन सुसज्जित सेनायाः समक्षं आधुनिक रायफल द्वारा युद्धं सम्भवम्ः न भवति । तदा स्वकीयं अस्तित्वं रक्षणाय रायफल स्वीकरणीया एव ।

वयं वास्तविकसमस्यायाः विश्लेषणस्य कृते अस्तित्वरक्षणाय आर्थिक विषमतायाः दोष निवारणाय प्रथानां रक्षणं केवल इत्थं एषा प्रथा अस्माकं अस्ति पुरातनी च ।

स्वस्य अस्तित्वरक्षणाय समाजस्य पुनर्गठनं करणीयम् , पुनर्गठनैः सह सामाजिकार्थिकराजनैतिकदृष्टिभिः अपि अग्रे वर्धनं कर्तव्यम् ।

४. परिस्थितिषु एतावती शक्तिः वर्तते । या अस्मान् स्वकीयेभ्यः वन्धनेभ्यः मुक्तं करोति । अत्र न स्वकीयायाः इच्छायाः आवश्यकता । अतः स्वस्य उद्देश्यं ध्याने स्थाप्य साधनानां स्वैच्छिक बुद्धिमतापूर्वकेण परिवर्तनस्य अधिकतमलाभः स्वीकरणीयः ।